**SHARADA** (A Peer-Reviewed Journal), [Vol. 1, No. 2, Whole No. 2, June 2026], ISSN: 3102-0658 (P)

# अद्वैतदर्शनसम्मतपञ्चकोशसिद्धान्तविवेकः

**उमेशप्रसादघिमिरे (विद्यावारिधिः)**

*उपप्राध्यापकः, ने.सं.वि., वाल्मीकि-विद्यापीठम्*

ug2umesh@gmail.com

https://orcid.org/0009-0005-9884-0562

https://doi.org/10.3126/srj.v1i2.99120

**शोधसारः**

*अद्वैतदर्शनान्तर्गतायां तैत्तिरीयोपनिषदि प्रतिपादितः पञ्चकोशसिद्धान्तः पौरस्त्यदर्शनस्यैवैकाऽद्वितीया दार्शनिक्यवधारणा विद्यते। इयञ्चावधारणा मानवीयमस्तित्वं खल्वन्नमय-प्राणमय-मनोमय-विज्ञानमयाऽऽनन्दमयाख्यैः पञ्चसङ्ख्यकैरावरणैराच्छादितमिति विश्लेषयति। अयञ्च सिद्धान्त आत्मन उपाधिभेदस्य च प्रतिपादनपूर्वकमात्मसाक्षात्कारस्य क्रमबद्धं मार्गं प्रस्तौति। यद्यप्यस्मिन् विषये नैके ग्रन्थाः समुपलब्धास्तथाप्यद्वैतदर्शदृशा व्यवस्थितमध्ययनमपेक्षाकृतं सीमितमेवोपलभ्यते। प्रस्तुतमेतदध्ययनं गुणात्मक-विश्लेषणात्मक-तुलनात्मकशोधपद्धतावाधारितमस्ति। अत्र च विशेषतया तैत्तिरीयोपनिषद्, शाङ्करभाष्यम्, वेदान्तसारः, विवेकचूडामणिः, पञ्चदशी चेत्यादि वेदान्तग्रन्थानामध्ययनमवलोकनमनुसन्धानं वा विहितमस्ति। अध्ययनेनैतेनैतत् स्पष्टमभूत्- वस्तुतः पञ्चकोशाः खल्वात्मनो नैव वास्तविकस्वरूपा अपि त्वविद्याजन्योपाधिभूताः सन्तीति। प्रस्तुतानामेतेषां पञ्चकोशानामतिक्रमणेनैतत्पञ्चावरणभङ्गेन वात्मसाक्षात्कार एव मोक्षस्यानिवार्यं साधनमस्ति। अन्नमयस्थूलशरीरादभ्यन्तरः शरीरसञ्चालनशक्तिरूपप्राणमयकोशः, प्राणमयकोशादभ्यन्तरः कर्तृरूपमनोमयकोशः, मनोमयकोशादभ्यन्तरो भोक्तृरूपविज्ञानमयकोशः, विज्ञानमयकोशादभ्यन्तरः कारणाज्ञानरूपानन्दमयकोशश्चात्मतत्त्वाव रकरूपाः पञ्चकोशाः सन्ति। तेषां पञ्चानामपि कोशानामधिष्ठानरूपेण साक्षिस्वरूपेण च सर्वोपाधिविवर्जितो नित्यशुद्धबुद्धमुक्तस्वभावः स्वयंप्रकाशो बोधस्वरूप आत्मा विद्यते, तदात्मविज्ञानादेव कर्तृत्वभोक्तृत्वप्रमातृत्वरूपः संसारो विलीयते, स्वात्मन्यवस्थारूपामृतलाभो भवतीत्यद्वैतदर्शनसम्मतः सिद्धान्तोऽत्र निस्सारितः। पञ्चकोशसिद्धान्तोऽयमद्वैतदर्शनात्मविद्यायाः प्रमुखाधारोऽस्ति, अयञ्च मानवव्यक्तित्वस्य चेतनाशक्तेस्तथा समग्रोन्नयनस्य कृते सार्वकालिकीं दार्शनिकीं संरचनामुपस्थापयति। शास्त्रीयप्रमाणाश्रितत्वात् तर्कसङ्गतव्याख्याविश्लेषणत्वात् समकालीनोपयोगित्वाच्चायं सिद्धान्तोऽधुनापि बौद्धिकदृष्ट्या व्यावहारिकदृष्ट्या च सान्दर्भिकः, प्रासङ्गिकः, सार्वकालिकश्चेति निष्कर्षः।*

**शब्दकुञ्जी-** अन्नमयकोशः, प्राणमयकोशः, मनोमयकोशः, विज्ञानमयकोशः, आनन्दमयकोशः।

## विषयपरिचयः

पौरस्त्यदर्शनपरम्परायामुपनिषदो वेदार्थसारभूताः स्वीक्रियन्ते। उपनित्सु जीवजगदीश्वरप्रकृतिपुरुषपरब्रह्मपरमात्मादीनां स्वरूपमनुभवजन्यविवेकेन यद्विविक्तंतद्विश्वदर्शनेतिहासेऽद्वितीयम्। उपनिषद्गीताब्रह्मसूत्राणि वेदान्तदर्शनस्य प्रस्थानत्रयग्रन्थत्वेन स्वीकृतानि, तत्राप्युपनिषदां स्थानं सर्वोपरि विद्यते।

उपनिषत्सु प्रतिपादितात्मविद्या न केवलं बौद्धिकविलासरूपाऽपि तु मानवजीवनपुरुषार्थेषु परमपुरुषार्थभूतमोक्षस्यानुभूतिमार्गपरा विद्यते। तैत्तिरीयोपनिषत् कृष्णयजुर्वेदस्य तैत्तिरीयशाखाया-स्तैत्तिरीयारण्यकान्तर्गतोपनिषद् विद्यते। तैत्तिरीयारण्यकस्य दशाध्यायेषु सप्तमाष्टनवमा अध्याया एव तैत्तिरीयोपनिषदित्युच्यते। अस्या ब्रह्मानन्दवल्ल्यां भृगुवल्ल्याञ्च वर्णितः पञ्चकोशसिद्धान्तो वेदान्तदर्शनस्य मौलिकः प्रभावशाली विचारोऽस्ति। एतत्सिद्धान्तानुसारमात्माऽन्नमय-प्राणमय-मनोमय-विज्ञानमयाऽऽनन्दमयाख्यैः पञ्चकोशैरावृतोऽस्तीति प्रतीयते। एते कोशा नैवात्मनो वास्तविकं स्वरूपमपितु तस्योपाधिरूपोपाधयो विद्यन्ते। आत्मज्ञानायैतेषामावरणानां क्रमशो विवेकेन तैःसह स्थापितस्य मिथ्यातादाम्यसम्बधस्य परित्यागोऽपरिहार्यो भवति। एतेन पञ्चकोशसिद्धान्तो वेदान्तदर्शन आत्मसाक्षात्कारस्य क्रमिकसाधनायां दार्शनिकमाधारं प्रस्तौति।

## पूर्वकार्यसमीक्षा

पञ्चकोशसिद्धान्तस्य प्रामाणिकी व्याख्या शङ्कराचार्येण तैत्तिरीयोपनिषच्छाङ्करभाष्ये विहिताऽस्ति। अन्नमयादारभ्याऽऽनन्दमयपर्यन्ताः सर्वेऽपि कोशा नैवात्मापि त्वविद्याजन्योपाधय एवेति शङ्करमतम्। एतेषां सर्वेषामपि कोशानामात्मा साक्षी विद्यते। सचात्मानित्य: शुद्धश्चैतन्यरूपोऽस्ति। शरीरप्राणमनोबुद्धिकारणै:सह स्थापितान्मिथ्यातादात्म्यसम्बन्धादुन्मोच्यात्मस्वरूपस्यावबोधनमेव पञ्चकोशविवेकस्योद्देश्यमिति शाङ्करमतम्। सदानन्दयोगीन्द्रेणापि वेदान्तसारग्रन्थे पञ्चकोशविवेकस्यात्मसाक्षात्कारस्यानिवार्यसाधनत्वमङ्गीकृतमस्ति। अन्नमयादिपञ्चकोशानामनात्मत्वेन तेषां निरसनेनैवात्मनः साक्षात्कार: सम्भवतीति वेदान्तसारनिष्कर्षः। एवमेव विद्यारण्यस्वामिनापि पञ्चदशीग्रन्थे पञ्चकोशविवेकस्यात्मसाक्षात्कारसाधनत्वेनाङ्गीकारपूर्वं पञ्चकोशसम्बद्धं विस्तृतमेव विवेचनं कृतमवलोक्यते। एवमेवशङ्कराचार्येण विवेकचूडामणौ पञ्चकोशविवेकमाध्यमेनात्मानात्मनोर्भेदः प्रतिपादितोऽस्ति। नेपालभारतदेशीयैरनेकैर्विद्वज्जनैश्च पञ्चकोशसिद्धान्तस्य चर्चा विहितोपलभ्यते। तत्र राधाकृष्णन्-बलदेव-दीर्घराजघिमिरे-शिवराजकौण्डिन्न्यायन-रामानन्दगिरि-सुमोदवर्धनकौण्डिन्न्यायनश्चेत्यादीनां विदुषां विविधग्रन्थेषु पञ्चकोशसम्बद्धाः प्रकीर्णा विचाराः समुपलभ्यन्ते। एतेषु पूर्वकार्येषु पञ्चकोशसिद्धान्तस्यानेकायमा उल्लिखितास्तु सन्ति सामान्यतया परमाधुनिकानुसन्धानदृष्ट्या पञ्चकोशसिद्धान्तस्य व्यवस्थितमध्ययनन्तु दुर्लभमेव।

## शोधान्तरालम्

यद्यपि पञ्चकोशसिद्धान्तविषयकाण्यनेकान्यध्ययनानि सम्प्राप्यन्ते तथाप्याधुनिकानुसन्धानपद्धतिमाश्रित्य कृतान्यध्ययनानि नैव पर्याप्तानि सन्ति। तैत्तिरीयोपनिषन्मन्त्रशाङ्करभाष्योत्तरवर्तिवेदान्तप्रकरणग्रन्थानां समन्वितरूपेणव्यवस्थितमध्ययनमपेक्षाकृतं न्यूनमस्ति। अनेकशोधग्रन्थेषु पञ्चकोशसिद्धान्तस्य योगेन मनोविज्ञानेन वा साकंसम्बन्ध: स्थापितः किन्त्वद्वैतदर्शनस्य मूलतत्त्वानामात्मोपाधिभूतपञ्चकोशानां गहनं विश्लेषणं नैव पर्याप्तम्।

पूर्वाध्ययनं शास्त्रीयस्रोतसां गहनविश्लेषणरहितञ्चावलोक्यते। प्रस्तुतमेव शोधान्तरालं पूरयितुमस्मिन्नालेखे पञ्चकोशसिद्धान्तस्य शास्त्रीयं दार्शनिकं तुलनात्मकञ्च समग्रमध्ययनं कृतमस्ति।

## शोधसमस्या

'अद्वैतदर्शनसम्मतपञ्चकोशसिद्धान्तविवेकः' इति शीर्षकनिर्दिष्टा समस्यैवास्याध्ययनस्य प्रधानाऽखण्डाच समस्या विद्यते। तत्सम्बद्धौ शोधप्रश्नौ यथा-

१. वेदान्तदर्शने प्रतिपादितस्य पञ्चकोशसिद्धान्तस्य मूलं दार्शनिकं स्वरूपं किम् ?

२. आत्मसाक्षात्कारप्रक्रियायां पञ्चकोशविवेक: कथं सहायक: ?

## शोधोद्देश्यम्

शोधलेखस्यास्यसमस्यासम्बद्धे प्रमुखोद्देश्ये निम्नलिखिते स्तः-

१. वेदान्तदर्शने प्रतिपादितपञ्चकोशसिद्धान्तमूलस्वरूपस्य दार्शनिकं विश्लेषणम्,

२. पञ्चकोशसिद्धान्तात्मसाक्षात्कारयोरन्त:सम्बन्धस्य शास्त्रीयं विवेचनम्।

## शोधपद्धतिः

शोधलेखोऽयंगुणात्मकदार्शनिकग्रन्थविश्लेषणात्मकानुसन्धानपद्धतावाधारितोऽस्ति। अत्र पुस्तकालयमनुसृत्य सामग्रीसङ्कलनं विहितमस्ति। वेदान्तदर्शने सम्प्राप्तानि पञ्चकोशसिद्धान्तसम्बद्धानि चिन्तनान्येव मूलसामग्रीत्वेनात्र गृहीतानि। तासां सामग्रीणां निर्मलीकरणार्थं व्यवस्थापनार्थञ्च गुणात्मकविध्यनुकूला वर्णनात्मकविश्लेषणात्मकतुलनात्मकविधय: प्रयुक्ताः। दर्शनशास्त्रप्रतिपादितं पञ्चकोशसिद्धान्तं केन्द्रीकृत्य वस्तुविश्लेषनिष्कर्षोपस्थापनादिकञ्च विहितमिति निगमनात्मको विधिश्चात्र स्वाभाविकतया प्रयुक्तोऽस्ति।

## शोधसीमा क्षेत्रञ्च

'वेदान्तदर्शनसम्मतपञ्चकोशसिद्धान्तविवेकः'इति शीर्षकीयोऽयमालेखो वेदान्तदर्शनमाधृत्य विनिर्मितः। वेदान्तदर्शनातिरिक्तदर्शनसम्मतपञ्चकोशसिद्धान्तस्य चर्चात्र नैव विहितेति शोधलेखस्यास्य सीमा क्षेत्रञ्च।

## पञ्चकोशसिद्धान्तस्य सैद्धान्तिक: पर्याधार:

पौरस्त्यदार्शनिकपरम्परायां मानवजीवनस्यास्तित्वविषयकं चिन्तनं सर्वाधिकं सूक्ष्ममेव समग्रं विश्लेषणमुपनिषत्सूपलब्धम्। मानवव्यक्तित्वस्य पञ्चस्तरीयस्य स्वरूपस्य व्यवस्थितं प्रतिपादनं सर्वप्रथमं तैत्तिरियोपनिषदि समुपलभ्यते। अत: पञ्चकोशसिद्धान्तस्य प्रामाणिकस्रोतरूपेणतैत्तिरीयोपनिषद् गृह्यते। तैत्तिरीयोपनिषदियंकृष्णयजुर्वेदान्तर्गता तैत्तिरीयशाखासम्बद्धा महत्त्वपूर्णोपनिषद् विद्यते। अस्यामुपनिषदि ब्रह्मानन्वल्ल्यां भृगुवल्ल्याञ्च विशेषरूपेण पञ्चकोशसिद्धान्तस्य निरूपणं विहितमिति तैत्तिरीयोपनिषदेवास्य पञ्चकोशसिद्धान्तस्याऽऽधारभूमिर्विद्यते। उपनिषदां शिक्षणपद्धतिः सर्वदैव बाह्यस्वरूपादन्तरस्वरूपे तथा

स्थूलस्वरूपात् सूक्ष्मस्वरूपेऽग्रसरिता भवति। अत्रच साधका जिज्ञासवो वा क्रमशः प्रत्येकानां कोशानामतिक्रमणर्पूवकमात्मसाक्षात्कारं कुर्वन्तीति विशेषः। पद्धतिरियं न केवलमाध्यात्मिकी साधनाऽपि त्वेकाविशिष्टा दार्शनिकी ज्ञानमीमांसात्मिका वा प्रक्रियास्ति, अस्यामवस्थायां ज्ञातृ (आत्मा)ज्ञेय(कोश)योर्मध्ये स्पष्टरूपेण भेदः स्थापितो भवति। अतस्तैत्तिरीयोपनिषत्तथावेदान्तदर्शनमेवास्य पञ्चकोशसिद्धान्तप्रतिपादनपरकस्य शोधलेखस्य सैद्धान्तिकः पर्याधारो विद्यते।

## विषयविश्लेषणम्

पौरस्त्याध्यात्मदर्शनपरम्परायामात्मस्वरूपजिज्ञासैव प्रधाना समस्या विद्यते। आत्मस्वरूपप्रकाशनाय वेदोपनिषदादिमूलग्रन्थेष्वेवार्षचिन्तकैर्महान् प्रयत्नो विहितोऽवलोक्यते। सर्वप्राणिषु मानवजीवनस्यातीव महत्त्वं वैशिष्ट्यञ्चाङ्गीकृत्य जीवनसार्थकाय मनुष्यैरात्मसाक्षात्कारो विधेय इत्यात्मा वारे द्रष्टव्य इत्यादिश्रुतिवाक्यैश्चोपदिष्टोऽस्ति। वैदिकोपनिषद्वाङ्मये स्थूलादिशरीरमेवात्मा भवितुं नार्हतीति विस्तृतेनैव विवेचितमस्ति। विशेषतस्तैत्तिरीयोपनिषदि 'यो वेद निहितं गुहायां परमे व्योमन्' इत्युक्त्या गुहाहितत्वेनात्मतत्त्वं विद्यमानमस्तीति स्पष्टतयोल्लिखितमुपलभ्यते। तत्रात्मतत्त्वस्याच्छादकत्वादन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयाख्यानां कोशानां गुहा संज्ञा प्रदत्ता विद्यते। तत्रान्नमयादभ्यन्तरः प्राणमयः, प्राणमयादभ्यन्तरो मनोमय:, मनोमयादभ्यन्तरो विज्ञानमय:, विज्ञानमयादभ्यन्तर आनन्दमयश्च पञ्चसङ्ख्यका: कोशा सन्तीत्युल्लिखितम्। ते चान्नमयादिपञ्चकोशा: खल्वात्मा भवितुं नार्हन्तीति तेभ्य: पृथक्साक्षिभूतोऽधिष्ठानस्वरूपो वाऽऽत्मतत्त्वमनुशीलनीयमिति तैत्तिरीयोपनिषदुपदेशमनुसृत्यात्रान्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयाख्यानां पञ्चकोशानां शास्त्रीयविवेचनपुरस्सरं तत्कोशादतिरिक्तस्याधिष्ठानभूतस्य साक्षिस्वरूपस्यात्मतत्त्वस्य स्वरूपविवेक एवास्य शोधलेखस्योद्देश्यमस्ति। अतोऽत्रात्मोपाधिभूतानामावरकानामन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयाख्यानां पञ्चकोशानां क्रमशो विवेचनं कृत्वाऽऽत्मात्मस्वरूपञ्चनिर्धायते।

### अन्नमयकोशविवेक:

पौरस्त्यदर्शनपरम्परायामन्नं न केवलमाहारविशेषोऽपि तु जीवनस्यमूलाधारो विद्यते। वैदिकार्षचिन्तकैरन्नं खलु जीवनेन, प्राणेन, यज्ञेन, धर्मेण, ब्रह्मज्ञानेन च सह सम्बद्धमित्यङ्गीकृतम्। तत्र तैत्तिरीयोपनिषदि तस्यान्नस्य महत्त्वं न केवलं पोषणसम्बद्धत्वेनगृहीतमपि त्वात्मविद्यायाः साधनाक्रमे प्रथमसोपानत्वेनोपवर्णितम्। पञ्चकोशेष्वन्नमयकोशोऽयं बाह्यं स्थूलं दृश्यमावरणमस्ति। अस्यान्नमयकोशस्य सूत्रवाक्यञ्च यथा- 'अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति। ' (तैत्तिरीयोपनिषद्- ३/२) अर्थादत्र पितुरुपदेशानन्तरं भृगुणाऽन्नमेव ब्रह्मेत्यवबुद्धम्। अन्नपरिणामभूताभ्यां रजोवीर्याभ्यामेव प्राणिनः समुत्पद्यन्ते, तदन्नग्रहणेनैव जीवन्ति, अन्ते चान्नमयपृथिव्यामेव विलीयन्त इत्यवज्ञायान्नमयकोश एव ब्रह्म इति निश्चयो भृगुणा विहितोऽस्तीति प्रसङ्गस्तत्र समागतोऽस्ति।

'अन्नविकारत्वादन्नमयः'इत्याचार्यशङ्करवचनादेतच्छरीरमेवान्नमयकोशो विद्यते। वेदान्तसिद्धान्तानुसारं पञ्चीकृतेभ्यः पञ्चमहाभूतेभ्यः (पृथिव्यप्तेजोवाय्वाकाशेभ्य:) स्थूलं शरीरं निर्मितमस्ति। अन्नमयकोशोऽयं नात्मा भवितुमर्हतीति विचार्य भृगुर्नैव सन्तुष्टोऽभूत्, अतः पुनरेव संशयमापन्नो भृगुर्वरूणं पितरमुपससार, अधीहि भगवो ब्रह्मेति। एतत्प्रसङ्गमुपस्थापयति विद्यारण्यमुनिर्यथा -'पितृभुक्तान्नजाद्वीर्याज्जातोऽन्नेनैव वर्धते। देहःसोऽन्नमयो नात्मा प्राक् चोर्ध्वं तदभावतः ॥' (पञ्चदशी-३/३) अत्रान्नमयस्य स्वरूपमुपदर्श्य तस्यानात्मत्वमपि दर्शितम्। मातृपितृभुक्ताद् यवव्रीह्यादिलक्षणादन्नाज्जायमानं यद्वीर्यमस्ति तस्माद्वीर्याद् यो देहो जात:, यश्च जननान्तरं क्षीराद्यन्नेनैव वर्धते स देहोऽन्नस्यैव विकारोऽस्ति, अतोऽयं पाञ्चभौतिकदेहोऽन्नमय इत्युच्यते। अयञ्च देहः समुत्पन्नः, सविकारः, विनाशी च विद्यते चेन्नित्यशुद्धबुद्धमुक्तस्वभाव आत्मा कथं भवितुंशक्नुयात् ? जन्मनः प्राक् मरणादूर्ध्वञ्चास्य देहस्याभावात्। तथा च रामकृष्णेन यथा प्रयोगो विहितः -'विवादाध्यासितो देह आत्मा न भवति कार्यत्वात् घटवदिति। ' (पञ्चदशी-३/३ : रामकृष्णप्रणीतव्याख्या, पृ.७३) एवं कार्यत्वहेतुना देहोऽयं घटवदात्मा भवितुं नार्हति, आत्मनो नित्यत्वात्। तथोपदिष्टं भगवता- 'अन्तवन्त इमे देहाः नित्यस्योक्ताः शरीरिणः। ' (श्रीमद्भगवद्गीता-२/१८) अर्थान्नित्यस्य शरीरिणो जीवात्मन इमे दृश्यमाना देहा अन्तवन्तः सन्तीति भावः। अत एव देहोऽयं जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते विनश्यति चेति यास्काचार्यपरिगणितषड्भावविकारयुक्तोऽस्ति। देहोऽयं जडो विद्यते चेदात्मा चेतनोऽस्ति, देह: परिवर्तनशीलोऽस्ति चेदात्मा नित्यो विद्यते, देहोऽयं दृश्यमानोऽस्ति चेदात्मा स्वयंप्रकाशशीलो द्रष्टा विद्यते, देहोऽयं ज्ञेयो विद्यते चेदात्मा साक्षी विद्यते, देहोनश्वरोऽस्ति चेदात्माऽविनाशी विद्यते, देहो विकारी विद्यते चेदात्मा निर्विकारोऽस्तीति देहात्मनोः परस्परपृथक्त्वं स्पष्टं भवति। यद्यद् दृश्यं तन्नैवात्मा भवितुमर्हति। तथा चोक्तं शङ्कराचार्येण-'त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंकुलम्। पूर्णं मूत्रपुरीषाभ्यां स्थूलं निन्द्यमिदं वपुः ॥ पञ्चीकृतेभ्यो भूतेभ्य: स्थूलेभ्यः पूर्वकर्मणा। समुत्पन्नमिदं स्थूलं भोगायतनमात्मनः। अवस्था जागरस्तस्य स्थूलार्थानुभवो यतः।। '(विवेकचूडामणि:-८९/९०) अर्थादन्नादुत्भूतमेच्छरीरं मलमूत्रपूर्णं विद्यते, स्थूलभूतेभ्यः पञ्चीकृतेभ्य: शरीरमेतत् समुत्पन्नमिति तच्च निन्द्यमस्ति न तु नित्यम्। आत्मनो भोगायतनं शरीरमिदमात्मा कथमपि भवितुं नार्हति। एतच्च स्थूलशरीरं जाग्रदित्यप्युच्यते। तदुक्तं सदानन्देन 'अस्यैषा समष्टि: स्थूलशरीरमन्नविकारत्वादन्नमयकोशः, स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदिति च व्यपदिश्यते। ' (वेदान्तसार:- ३१, पृ.१२०) एवञ्चविद्यारण्येनाप्युक्तम्- 'स्यात् पञ्चीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः। ' (पञ्चदशी-१/३४) एतेनान्नमयकोशइत्यनेन स्थूलदेहोऽस्तीत्यवज्ञायते। इममेव स्थूलदेहमात्मेत्यङ्गीकृत्य चार्वाकदर्शनं प्रवृत्तमवलोक्यते। तथा च कथयति सदानन्दः- 'चार्वाकस्तु- स वा एष पुरुषोऽन्नरसमय:' (तैत्तिरीयोपनिषद्-२/१/१) इत्यादिश्रुतेः, प्रदीप्तगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्, स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति। ' (वेदान्तसार:-३७, पृ.१३३) पौरस्त्यदर्शनेषु चार्वाकदर्शनमिदं भौतिकवादि दर्शनं मन्यते। एतच्च दर्शनं देहात्मवादि दर्शनञ्चास्ति। अत एव चार्वाकदर्शने पुनर्जन्म नाङ्गीक्रियते, यज्ञयागादीनाञ्च प्रयोजनञ्च नाङ्गीक्रियते। तथा चोक्तं चार्वाकदर्शने- 'न स्वर्गो नापवर्गोवा नैवात्मा पारलौकिकः। नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः ॥१॥ यावज्जीवेत् सुखं जीवेद् ऋणं

कृत्वा घृतं पिवेत्। भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥६॥ यदि गच्छेत् परं लोकं देहादेष विनिर्गतः। कस्माद् भूयो न चायाति बन्धुस्नेहसमाकुलः ॥७॥' (सर्वदर्शनसङ्ग्रहः, चार्वाकदर्शनम्, पृ.७) एवमेव देह एवात्मेति तन्मतम्, तथा चोक्तम्-'अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः। देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः ॥' (सर्वदर्शनसङ्ग्रहः, चार्वाकदर्शनम्-१, पृ. ६३-६४) अहं स्थूलः, अहं कृशोऽस्मीति प्रत्यक्षानुभवात् स्थौल्यादियोगाच्च देह एवात्मेति चार्वाकमतम्। यावत्पर्यन्तमन्नमयकोशाख्यं शरीरमस्ति तावत्पर्यन्तंजीवः सुखदुःखादिकमनुभवति। दुःखानुभवो नरकः, सुखानुभवश्च स्वर्गः। नरकरूपाद् दुःखान्मोक्षस्तदैव मिलति यदा देहस्योच्छेदो भवति। मृतञ्च शरीरं नैव दुःखमनुभवितुमर्हति। न च तन्मने सच्चिदानन्दरूपत्वमात्मनः सम्भवति। जनिमरणलक्षणस्यान्नमयकोशाख्यस्य स्थूलशरीरस्यैवात्मत्वाच्चार्वाकमते मरणमेव मोक्ष इति सिद्धान्तः प्रसिद्धः। बुद्धिहीना वराकाः खलु चार्वाकाः शरीरात्मवादिनो भौतिकवादिनो वा विद्यन्ते। चार्वाकाभिमतान्नमयकोशातिरिक्तमत्यन्त-सूक्ष्ममात्मतत्त्वमन्वेषणीयमित्यद्वैतवेदान्तमतमस्ति। अतो वेदान्तसिद्धान्तानुसारं पञ्चीकृतपञ्चमहाभूतजन्यं विनाशि स्थूलशरीरमेवान्नमयकोशो विद्यते, मातृपितृभुक्तयव ब्रीह्याद्यन्नजरजोवीर्याभ्यां जायमानो देह उत्पत्यनन्तरमपि यवाद्यन्नरसेनैव वर्धते च। अतोऽन्नमयो देहोऽन्नरसविकारत्वादात्मा भवितुं नार्हति। यतो हि जन्मनः प्राङ्गरणादूर्ध्वञ्च देहस्याभावो विद्यत इति दिक्।

**प्राणमयकोशविवेकः**

आत्मतत्त्वस्यावरको द्वितीयः कोशः प्राणमयो विद्यते। अयं कोशोऽन्नमयकोशादन्तरो विद्यते। अन्नमयकोशाख्यशरीरस्य गतिक्रियाकर्मसम्पादनाय प्राणमयकोश उत्तरदायी भवति। कर्मेन्द्रियैः सहितं प्राणादिपञ्चकमेव प्राणमयकोश इत्युच्यते। तथा चोक्तमाचार्यशङ्करेण-'कर्मेन्द्रियैः पञ्चभिरञ्जितोऽयं प्राणो भवेत्प्राणमयस्तु कोशः। येनात्मवानन्नमयोऽन्नपूर्णः प्रवर्ततेऽसौ सकलक्रियासु॥' (विवेकचूडामणिः-१६७)चक्षुरादीन्द्रियाणां प्रवर्तकः कोशोऽसौ सर्वशरीरे शक्तिं प्रयच्छति। एतेषां प्राणादीनां प्राणप्रचुरत्वात् प्राणमयत्वम्, आत्मन आच्छादकत्वाच्च कोशत्वञ्च। प्राणमयः क्रियाशक्तिमान् कार्यरूपोविद्यते। अस्य च प्राणमयकोशस्य बीजं यथा- 'प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति। प्राणंप्रयन्त्यभिसंविशन्तीति। ' (तैत्तिरीयोपनिषद्- ३/३)पितुरुपदेशान्तरं भृगुणा प्राण एव ब्रह्मेति ज्ञातम्। यतो हि प्राणशक्त्यैव सर्वाणि भूतानि जायन्ते, जातानि जीवन्ति, अन्ते च प्राण एव विलीयन्ते। प्राणमयस्य पुरुषस्य स्वरूपञ्च यथोपदिष्टमुपनिषदि-'तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः, तेनैष पूर्णः। स वा एष पुरुषविध एष। तस्य पुरुषविधतामन्वयं पुरुषविधः। तस्य प्राण एव शिरः, व्यानो दक्षिणः पक्षः। अपान उत्तरः पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। ' (तैत्तिरीयोपनिषद्- २/२/१)'तौ मिथुनं समैतां ततः प्राणोऽजायत'(बृहदारण्यकोपनिषद्- १/५/१२) इत्यादिश्रुतेर्वाङ्मनसो मिथुनीभूतयोरुत्पत्तिश्रवणात् प्राणमयस्य कार्यरूपत्वमवगम्यते। यथा कार्यभूतोऽन्नमयकोश आत्मान तथैव कार्यभूतः प्राणमयकोशोऽपि नैवात्माभवितुमर्हति। तथा चोक्तं शङ्कराचार्येण-'नैवात्मापि प्राणमयो वायुविकारो गन्तागन्ता वायुवदन्तर्बहिरेषः। यस्मात् किञ्चित्क्वापि न वेत्तीष्टमनिष्टंस्वं वान्यं वा

किञ्चन नित्यं परतन्त्रः ॥ (विवेकचूडामणि:- १६८) अर्थाद् वायुविकारभूतोऽयं प्राणमय आत्मा भवितुं नार्हतीति वेदान्तसिद्धान्तः। अन्नमये स्थूलशरीरे यथात्मबुद्धिरविद्याकल्पिता तथैव प्राणमयकोशेऽप्यात्मबुद्धिरविद्याकल्पितैवाऽस्ति। परं स्थूलबुद्धियुक्ताश्चार्वाका: प्राणमयकोशमप्यात्मेत्यङ्गीकुर्वन्ति। तथा च कथयति सदानन्दः- 'अपरश्चार्वाक: "ते ह प्राणा: प्रजापतिं पितरमेत्योचु:" (छान्दोग्योपनिषद्- ५/१/७)इत्यादिश्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात्, काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेन्द्रियाण्यात्मेति वदति। 'अपरश्चार्वाकः "अन्योऽन्तर आत्मा प्राणमयः" (तैत्तिरीयोपनिषद्- २/२/१)इत्यादिश्रुते: प्राणाभाव इन्द्रियादिचलनायोगाद्, अहमशनायावानहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेति वदति। ' (वेदान्तसार:- ३८/३९, पृ.१३८)कार्यरूपस्य प्राणमयकोशस्यात्मत्वमङ्गीकुर्वतां चार्वाकानां मतं नैव सुन्दरम्, न चादरणीयम्। प्राणस्तु मम जीवनशक्तिर्विद्यते नत्वहं प्राण:। प्राण आगच्छति गच्छति च। तस्या: प्राणागमनगमनस्थितेरहं साक्षीत्यनुभवाच्च प्राणस्यात्मव्यतिरिक्तत्वमितिवेदान्तसिद्धान्तः।

जीवस्य जीवनार्थं शरीरसञ्चालनार्थञ्च प्राणस्यावश्यकत्वमपरिहार्यमस्ति किन्तु तस्मिन् प्राणमयकोशआत्मबुद्धिस्त्वविद्याजन्याऽध्यासमूला वेति वेदान्तमतम्। जीवनस्योर्जाशक्तिरूपेण प्राणस्य महत्त्वमङ्गीकर्तव्यम्, परन्तु तत्र तादात्म्यभावो नैव विधेय इति वेदान्तानुशासनम्। प्राणस्य प्राणः, अपानः, समानः, उदानः, व्यानश्चेति भेदात्पञ्चविधत्वम्। तथा च-'हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले। उदान: कण्ठदेशे स्याद् व्यान: सर्वशरीरगः। । ' (श्रुतमात्रम्)एतत्प्राणादिपञ्चकमाकाशादिगतरजोंऽशेभ्यो मिलितेभ्य उत्पद्यते। इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत् प्राणमयकोशो भवति। अस्य क्रियात्मकत्वेन रजोंऽशकार्यत्वमिति वेदान्तसिद्धान्तनिष्कर्षः। सच प्राण आत्मा कथमपि भवितुं नार्हति। तथा च कथयति विद्यारण्यमुनि:-

'पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्तकः।

वायुः प्राणमयो नासावात्मा चैतन्यवर्जनात्॥'(पञ्चदशी- ३/५)

अर्थाद् यो वायुः शरीर आपादतलमस्तकं व्याप्त: सन् बलं प्रयच्छन् चक्षुरादीन्द्रियाणां प्रेरको वर्तते स एव वायु:प्राणमय इत्युच्यते। सच प्राणो न कथमपि सच्चिदानन्दरूप आत्मा भवितुमर्हति जडस्वभावात्। तथा च प्रयोग 'विवादाध्यासितः प्राण आत्मा न भवति जडत्वाद् घटादिवदिति। ' (पञ्चदशी- ३/५ : रामकृष्णविरचितव्याख्या, पृ.७४) अयं प्राणमयकोश: जडो विद्यते चेदात्मा नित्यो वर्तते। प्राण: परिवर्तनस्य विषयो भवति चेदात्मा नैव परिवर्तते। य: परिवर्तनस्य विषयो भवति स कदापि नित्य आत्मा भवितुं नार्हति। यथा स्थूलशरीरस्य नामान्नमय कोशस्तथैव सूक्ष्मशरीरस्यैकाङ्गविशेष: प्राणमयकोशोऽस्ति। प्राणमयपुरुषे प्राणस्य बाधो भवति परन्तु पुरुषस्य (आत्मन:) बाधो नभवति। एकस्यैवात्मनो बाह्यतममावरणमन्नमयकोशोऽस्ति चेत्तस्मादप्यान्तरमावरणं प्राणमयकोशो विद्यते। आत्मतत्त्वज्ञानाय प्राणमयस्यापि कोशस्यातिक्रमणमावश्यकम्। अत एव तैत्तिरीयोपनिषदि पुनरपि पितरं वरूणं प्रति भृगुरुपसन्न: सन् 'अधीहि भगवो ब्रह्मेति कथयति। अतोऽन्नमयकोशवत् प्राणमयकोशोऽपि नैव नित्य आत्मेति सिद्ध्यति।

**मनोमयकोशविवेकः**

मन एव ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति। शरीरेऽहंभावन्तथा शरीरसम्बन्धिस्त्रीपुत्रादौ ममाभिमानं कुर्वन् मनोमयपुरुषः कामक्रोधादिविकारेण विक्रियमाणो भवति। विक्रियमाणत्वादस्याविक्रियात्मत्वं नैव संभवति। अत एव विद्यारण्यमुनिना प्रोक्तं यत्- 'अहन्तां ममतां देहे गेहादौ च करोति यः। कामाद्यवस्थाया भ्रान्तो नासावात्मा मनोमयः॥' (पञ्चदशी- ३/६) अर्थाद् देहेऽहं भावं गृहादौ च मदीयत्वाभिमानं यः करोति स एव मनोमय इत्युच्यते। मनोमयपुरुषस्य स्वरूपञ्चोपनिषदि यथोपदर्शितम्- 'तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमयः। तेनैष पूर्णः। स वा एष पुरूषविधतामन्वयं पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश आत्मा। अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा। ' (तैत्तिरियोपनिषद्- २/३/१) अर्थान्मनोमयः पुरुषो वेदमयो विद्यते। आत्मनो वैदिकं परोक्षज्ञानं मनोमयकोशे निवसति। मनोमयः पुरुष एव ब्रह्मेति भृगुणा पूर्वं निश्चितम्। अर्थान्मनोमयकोशस्य बीजवाक्यं यथा- 'मनो ब्रह्मेति व्यजानात्। मनसो ह्येव खल्विमानि भूतानि जायन्ते। मनसा जातानि जीवन्ति। मनः प्रयन्त्यभिसंविशन्तीति। ' (तैत्तिरीयोपनिषद्- ३/४/१) मनस एव सर्वाणि भूतानि जायन्ते, मनसैव जातानि सर्वाणि जीवन्ति, प्रयाणकाले च मनसि सर्वाणि विलीयन्त इति मन एव ब्रह्मेत्यवबुद्धं भृगुणा। लौकिकविषयाणां ज्ञानन्तथा पूर्वपूर्वविषयाणां ज्ञानकर्मभोगानां परिपाकभूता सर्वाऽपि वासना मनोमयकोषस्यान्तर्गता। अयं मनोमयकोषोऽपि सूक्ष्मशरीरस्याङ्गभूतोऽस्ति। मनः, अहङ्कारश्च सर्वं मन एव। तथाच श्रुतिः- 'कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव। '(बृहदारण्यकोपनिषद्- १/५/३) अत एव कामादेरपि मनोमयत्वम्।

शङ्कराचार्येण विवेकचूडामणिग्रन्थे मनोमयकोशस्य स्वरूपं यथा प्रदत्तम्- 'ज्ञानेन्द्रियाणि च मनश्च मनोमयः स्यात्- कोशो ममाहमिति वस्तुविकल्पहेतुः। संज्ञादिभेदकलनाकलितो बलीयांस्तत्कोशमभिपूर्य विजृम्भते यः॥ पञ्चेन्द्रियैः पञ्चभिरेव होतृभिर्प्रचीयमानो विषयाज्यधारया। जाज्वल्यमानो बहुवासनेन्धनैर्मनोमयाग्निर्दहति प्रपञ्चम्॥' (विवेकचूडामणिः- १६९/१७०) पञ्चज्ञानेन्द्रियैः सहितं मन एव मनोमयकोश इत्युच्यते। अहंममेति वस्तुविकल्पहेतुरपि मनोमयकोशोऽस्ति। ज्ञानेन्द्रियरूपपञ्चभिरेव होतृभिर्विषयाज्यधारया प्रचीयमानो बहुवासनेन्धनैर्जाज्वल्यमानो मनोमयाग्निः प्रपञ्चं दहतीत्यर्थः। वस्तुतो मन एव संसारहेतुरविद्याऽस्ति। तस्मिन् मनसि विनष्टे सकलं विनष्टं भवति चेत् तस्मिन् विजृम्भिते सकलं विजृम्भते। तथा चोक्तं शङ्कराचार्येण-'नह्यस्त्यविद्या मनसोऽतिरिक्ता मनोह्यविद्या भवबन्धहेतुः। तस्मिन् विनष्टे सकलं विनष्टं विजृम्भितेऽस्मिन्सकलं विजृम्भते॥' (विवेकचूडामणिः- १७१)जाग्रत् स्वप्नश्च मनसो विजृम्भणे स्तः। यदा मनःप्रलीनं भवति तदा किञ्चिदपि न विद्यते, यथा सुषुप्तिः। वस्तुतो मन एव संसारः, मनस अभावे संसारो नास्ति, अतः संसारो नैव वास्तविक इति वेदान्तसिद्धान्तः। तथा चोक्तमाचार्येण- 'स्वप्नेऽर्थशून्ये सृजति स्वशक्त्या भोक्त्रादिविश्वं मन एव सर्वम्। तथैव जाग्रत्यपि नो विशेषस्तत्सर्वमेतन्मनसो विजृम्भणम्॥ सुषुप्तिकाले मनसि प्रलीने नैवास्ति किञ्चित्सकलप्रसिद्धेः। अतो मनः कल्पित एव पुंसः संसार एतस्य न वस्तुतोऽस्ति॥'(विवेकचूडामणिः- १७२/१७३)सुषुप्तिकालेऽज्ञाने मनः प्रलीयते, तस्मिन् काले संसारोऽपि विलीयते, अतः सर्वं प्रपञ्चजातं मनस एव विजृम्भणमित्यद्वैतदर्शनमतम्। अतएवोच्यते- 'मनो नाम

महाव्याघ्रो विषयारण्यभूमिषु। चरत्यत्र न गच्छन्तु साधवो ये मुमुक्षवः ॥'(विवेकचूडामणिः- १७८)विषयारण्यभूमिषु मनोनाम महाव्याघ्रश्चरति, अतस्तत्रारण्ये ये मुमुक्षव: साधव: सन्ति ते कदापि नैव गच्छन्तु। मनोराज्यमवलोकयतु परन्तत्र निमग्नो न भवत्वित्याशय:। मन: खलु विपरिणमते, तद्विरिणामस्य साक्षी विद्यते खल्वात्मा। 'तन्मनोऽसृजत' इत्यादिश्रुतेर्मनसः सादित्वं कार्यत्वं वा सिद्ध्यति चेदात्माऽनादिर्विद्यते। मनोमयकोशस्तस्यैव नित्यस्यात्मनस्तृतीयमावरणमस्ति। 'अहं ज्ञानवान्, अहं वासनावान्, अहं विक्षिप्तः, अहं समाधिस्थः, अहं दुःखी, अहं सुखी'चेत्यादिकं सर्वमभिमानजातं मनोमयपुरुषस्य वैशिष्ट्यम्। सर्वेऽपि धर्मोपासनायोगसाधनादयो मनोमयकोशस्य विशुद्ध्यर्थमनुष्ठीयन्ते। मन एव मनुष्याणां कारणं बन्धमोक्षयोरिति मलिनं मनो बन्धकारणमस्ति चेद् विशुद्धं मनो मोक्षस्य हेतुर्विद्यते। उक्तञ्चाचार्यशङ्करेणापि-

'वायुना नीयते मेघः पुनस्तेनैव नीयते।
मनसा कल्प्यते बन्धो मोक्षस्तेनैव कल्प्यते ॥

देहादिसर्वविषये परिकल्प्य रागं बध्नाति तेन पुरुषं पशुवद्गुणेन। वैरस्यमत्रविषवत्सु विधाय पश्चादेनं विमोचयति तन्मन एव बन्धात् ॥ तस्मान्मनः कारणमस्य जन्तोर्बन्धस्य मोक्षस्य च वा विधाने। बन्धस्य हेतुर्मलिनं रजोगुणैर्मोक्षस्य शुद्धं विरजस्तमस्कम् ॥' (विवेकचूडामणिः- १७४/१७६)यथा वायुनैवानीयमानो मेघो वायुनैवनीयते तथैव मनसा कल्पितो बन्ध: शास्त्राचार्योपदेशसंस्कारसंस्कृतेन मनसा निषिद्धो भवति। देहादिसर्वविषयेषु रागं परिकल्प्य तन्मन एव पशुवद् गुणेन बध्नात्यज्ञानदशायाञ्चेत्तत्रैव विषवत्सु विषयेषु पश्चाद् वैराग्यमुत्पाद्य बन्धनात् पुरुषं मोचयति। अत एवास्य जन्तोर्बन्धस्य मोक्षस्य च कारणमेकमेव मनो विद्यते। रजोगुणैर्मलिनं मनोबन्धस्य कारणं भवति चेच्छुद्धं मनो मोक्षस्य कारणंभवतीति वेदान्तराद्धान्तः। तथा चोक्तमाचार्येण:- 'अत: प्राहुर्मनोऽविद्यां पण्डितास्तत्त्वदर्शिन:। येनैव भ्राम्यते विश्वं वायुनेवाभ्रमण्डलम्।। तन्मनः शोभनं कार्यं प्रयत्नेन मुमुक्षुणा। विशुद्धे सति चैतस्मिन्मुक्तिं करफलायते।। ' (विवेकचूडामणिः-१८२/१८३) वस्तुतो मन एवाविद्यास्तीति तत्त्वदर्शिनः पण्डिताः कथयन्ति। तेनैव मनसा विश्वं वायुनाभ्रमण्डलमिवभ्राम्यते। अतस्तन्मन: शोभनं प्रयत्नेन विधातव्यम्। तस्मिन् मनसि विशुद्धे सत्येव मुक्तिरवाप्यते। अतो मनोनिग्रहमेव मुमुक्षुणा प्रकर्तव्यमिति वेदान्तसिद्धान्तः। तच्च मनोनैवात्मा भवितुमर्हति, विद्याविद्ययोराश्रयं मन एवास्ति। मनसोऽनात्मत्वेऽयं प्रयोग:- 'मनोमय आत्मा न भवति, विकारित्वाद्देहवदिति। '(पञ्चदशी- ३/६ : रामकृष्णव्याख्या, पृ.७५)अतोऽयं मनोमय: पुरुष:(मनोमयकोश:) विकारित्वादविकार्यात्मा भवितुं नार्हति, यथा देह आत्माभवितुं नार्हतीति मनोमयकोशमतिक्रम्यात्मतत्त्वस्यान्वेषणं कर्तव्यमिति वेदान्तमतम्।

**विज्ञानमयकोशविवेक:**

मनोमयकोशादाभ्यन्तरो विज्ञानमयकोशो विद्यते। मनोमयकोशस्यात्मा विज्ञानमयकोशो मन्यते। तथा च श्रुतिप्रमाणम्- 'तत्माद्वा एतस्मात् मनोमयादन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः सवा एष पुरुषविध एव। तस्य पुरुषविधतामन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणःपक्षः। सत्यमुत्तर: पक्ष:। योग आत्मा। महः पुच्छं प्रतिष्ठा। ' (तैत्तिरीयोपनिषद्- २/४/१)मनोमयादाभ्यन्तरो विज्ञानमयकोशो विद्यते, तेनैव मनोमयकोश: परिपूर्णोऽस्ति।

मनोमयकोशस्यान्नमयकोशस्येव विज्ञानमयकोशस्याकारो भवति। तस्य विज्ञानमयस्य शिरः श्रद्धाऽस्ति, ऋतं दक्षिणः पक्षोऽस्ति, सत्यमुत्तरः पक्षोऽस्ति, योग आत्मा (मध्यभागः) अस्ति, महत्तत्त्वञ्च पुच्छं प्रतिष्ठा विद्यत इतिश्रुत्यर्थः। अस्मिन् विज्ञानमयकोशे पञ्चज्ञानेन्द्रियैः सहिता बुद्धिर्भवति। पुरुषस्य कर्तृत्वाभिमानोऽपि कोशेऽस्मिन्नेव तिष्ठति। व्यष्टिबुद्धेः कारणं महत्तत्त्वमस्ति, तस्माद् विज्ञानमयकोशस्य प्रतिष्ठा महत्तत्त्वमेव। लौकिकवैदिककर्माणां विज्ञानम् लौकिक-वैदिकसत्यस्वरूपस्य निश्चयः, तन्निश्चयविपरीतानामाशङ्कानां समाधानन्तथाऽनुकुलयुक्तीनामुद्बोधनञ्च विज्ञानमयकोशस्य कार्यम्। 'अहं कर्ता, अहं भोक्ता, अहं प्रमाता, अहं दुःखी, अहं सुखी, अहं पुण्यवान्, अहं पापी, अहं देही, अहं जीवात्मा'इत्यादयोऽभिमानपूर्वकव्यवहारा विज्ञानमयकोशस्यैव विकाराः सन्ति, एतस्य विज्ञानमयकोशस्य पूर्ववर्तित्रिविधकोशेषु व्याप्तत्वादिति कथनं युक्तियुक्तम्- एतद्विज्ञानमयकोशमेव बौद्धदर्शनमात्मेति स्वीकरोति। तथा चोक्तम्- 'बौद्धस्तु अन्योऽन्तर आत्मा विज्ञानमयः' (तैत्तिरीयोपनिषद्- २/४/१) इत्यादिश्रुतेः, कर्तुरभावे करणस्य शक्त्यभावाद्, अहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति। ' (वेदान्तसारः- ४१, पृ.१४०) बौद्धदर्शने वैभाषिक-सौत्रान्तिक-योगाचार-माध्यमिकाख्याश्चत्वारः सम्प्रदायाः प्रसिद्धाः सन्ति। तत्र तत्र योगाचारमतानुसारं विज्ञानमेव बाह्यपदार्थरूपेण भासितमस्ति। तच्च विज्ञानं क्षणिकमस्ति। विज्ञानं क्षणपर्यन्तं स्थित्वा विनश्यति। प्रथमं विज्ञानं, द्वितीयं विज्ञानमुत्पादयति, द्वितीयं पुनः तृतीयम्, तृतीयञ्च चतुर्थमुत्पादयति, इत्यादिरीत्या विज्ञानसन्तानपरम्परेयं मृत्युपर्यन्तं चलति। एतदेवालयविज्ञानमित्यप्युच्यते। एतदेव विज्ञानमात्मेति विज्ञानवादेऽङ्गीक्रियते। आत्मभूतविज्ञानाभावे करणरूपं मनः किञ्चित् कर्तुं नशक्नोतीति तन्मतम्। वेदान्तमते विज्ञानमयकोशो नैवात्माऽपि त्वात्मतत्त्वस्यावरकोऽस्ति। तथाच कथयति विद्यारण्यमुनिः-

'लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा।

चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक्।।' (पञ्चदशी- ३/७)

या चिदाभासयुक्ता बुद्धिः सुप्तिकाले विलीना सती जागरणकाले नखाग्रपर्यन्तं शरीरं संव्याप्य तिष्ठति सा विज्ञानमयशब्देनोच्यते। अयमपि विज्ञानमयकोशो नैवात्मा भवितुमर्हति। तथा च प्रयोगः- 'असावप्यात्मा न भवति विलयाद्यवस्थत्वात् घटादिवदित्यर्थः। ' (पञ्चदशी- ३/७ : रामकृष्णविरचितव्याख्या- पृ. ७५) घटादिवद् विनष्टस्वभावत्वाद् विज्ञानमयकोशो नैवाविनाश्यात्मा भवितुमर्हतीत्याशयः। अयं विज्ञानमयकोशः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानत्वेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते। चैतन्यं प्रति सन्निहितत्वादस्य विज्ञानमयस्य ज्ञानशक्तिमत्वञ्च स्वाभाविकमेव। एवं विज्ञानमयकोशस्य स्वरूपं यथोपदिशति शङ्कराचार्यः- 'बुद्धिर्बुद्धीन्द्रियैः सार्धं सवृत्तिः कर्तृलक्षणः। विज्ञानमयकोशः स्यात् पुंसः संसारकारणम् ॥ अनुव्रजच्चित्प्रतिबिम्बशक्तिविज्ञानसंज्ञः प्रकृतेर्विकारः ॥ ज्ञानक्रियावानहमित्यजस्रं देहेन्द्रियादिष्वभिमन्यते भृशम् ॥ अनादिकालोऽयमहंस्वभावो जीवः समस्तव्यवहारवोढा। करोति कर्माण्यपि पूर्ववासनः पुण्यान्यपुण्यानिच तत्फलानि ॥ भुङ्क्ते विचित्रास्वपि योनिषु व्रजन्नायाति निर्यात्यधऊर्ध्वमेषः। अस्यैव विज्ञानमयस्य जाग्रत्स्वप्नाद्यवस्था सुखदुःखभोगः। । देहादिनिष्ठाश्रमधर्मकर्मगुणाभिमानं सततं ममेति। विज्ञानकोशोऽयमतिप्रकाशः

प्रकृष्टसान्निध्यवशात्परात्मनः। अतो भवत्येष उपाधिरस्य यदात्मधी: संसरति भ्रमेण ॥ योऽयं विज्ञानमय: प्राणेषु हृदि स्फुरत्स्वयंज्योति:। कूटस्थ: सन्नात्मा कर्ता भोक्ता भवत्युपाधिस्थ: ॥' (विवेकचूडामणि: - १८६-१९१), अथादयं विज्ञानमयकोश एव संसारकारणं भवति। वस्तुतोऽयं कोश: प्रकृतेरेव विकारोऽस्ति। अयमेव देहेन्द्रियादिष्वभिमन्यते, समस्तव्यवहारवोढाऽहं स्वभावो जीव: स एवास्ति। पूर्ववासन: स एव पुण्यापुण्यानि कर्माणि करोति, तत्फलानि च भुङ्ते। कर्मार्जितपुण्यापुण्यवशादनेकयोनिं प्राप्नोति। अस्यैवजाग्रत्स्वप्नाद्यवस्था, सुखदुःखभोगश्च। देहादिनिष्ठाश्रमधर्मकर्मगुणाभिमानञ्चकृत्वा सततं ममेति कथयति स एव। आत्मन: प्रकृष्टसान्निध्यवशाद् विज्ञानमयकोशोऽयमतिप्रकाशो विद्यते। आत्मन उपाधिरेवास्ति विज्ञानमयकोश: तत्रात्मधीर्भ्रमेणाध्यासवशाद् वा संसरति। तदुपाधिवशादेव कूटस्थ:सन्नप्यात्मा कर्ता, भोक्ता, प्रमाता भवतीत्यद्वैवेदान्तसिद्धान्त:। वस्तुत आत्मा कर्तृभोक्तृप्रमातृरूपो विज्ञानमयकोशो नैव भवितुमर्हति, तस्याकर्तृत्वादभोक्तृत्वादप्रमातृत्वाच्च।

**आनन्दमयकोशविवेक:**

आनन्दमयकोशोऽयं पञ्चकोशसिद्धान्तस्य चरमावरकोऽस्ति। अयमपि कोशो नैवात्मन: स्वरूपमपि त्वावरकतत्त्वमस्ति। आत्मतत्त्वसाक्षात्कारायोपाधिभूतस्यास्य कोशस्याप्यतिक्रमणमावश्यकं भवतीति वेदान्तसिद्धान्तः। विज्ञानमयकोशादान्तरिक आनन्दमयकोशो विद्यते। चिच्छायोपेतं कारणाज्ञानमानन्दमयकोशत्वेन प्रोच्यते। आनन्दमयकोशस्य बीजवाक्यमुपनिषदि चोपलभ्यते यथा- 'तस्माद्वा एतस्माद् विज्ञानमयादन्योऽन्तर आनन्दमयः, तेनैष पूर्णः। स वा एवं पुरुषविध एव। तस्य पुरुषविधतामन्वयं पुरुषविध:। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तर:पक्ष:। आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा। ' (तैत्तिरीयोपनिषद्- २/५/१) अर्थाद्विज्ञानमयकोशादन्योऽन्तर: कोशो विद्यते स आनन्दमयकोश इत्युच्यते। अयंकोशो विज्ञानमयकोशस्यात्मा विद्यते। अस्मिन् कोशेऽहंममेतिभावनयाऽवस्थितमात्मचैतन्यमेवानन्दमयपुरुष इत्युच्यते। अस्यानन्दमयस्य पुरुषस्याकारोऽपि विज्ञानमस्यान्नमयस्य वेव भवति। अस्य पुरुषस्य प्रियमेव शिरोऽस्ति। मोदो दक्षिण: पक्षोऽस्ति, प्रमोद उत्तर: पक्षोऽस्ति, आनन्द आत्मा विद्यते, ब्रह्मैव च पुच्छं प्रतिष्ठा विद्यत इत्यवयवकल्पना श्रुत्या प्रदर्शिता।

प्रभाकरा मीमांसकास्तथा नैयायिकाश्चानन्दमयपुरुषमेवात्मेत्यङ्गीकुर्वन्ति, तथा हि- प्राभाकरतार्किकौ तु 'अन्योऽन्तरआत्मानन्दमय:' (तैत्तिरीयोपनिषद्- २/५/१) इत्यादिश्रुतेर्बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहं ज्ञानीत्याद्यनुभवाच्चाज्ञानमात्मेति वदत:। ' (वेदान्तसारः- ४२, पृ.१४२) अर्थान्मीमासादर्शने प्रसिद्धयोराचार्ययो: कुमारिलभट्टप्रभाकरयोर्द्वयोर्महत्त्वपूर्णमवदानमस्ति। आचार्यमतमित्यनेन कुमारिलभट्टमतन्तथा गुरुमतमित्यनेन प्रभाकरमतमवज्ञायते। कुमारिलभट्टस्य मतानुयायिनो भाट्टा इति प्रोच्यन्ते। तेप्राभाकरा नैयायिकाश्चात्मनो द्रव्यरूपत्वमङ्गीकुर्वन्ति, अत एवतन्मते जडमज्ञानरूपमात्मेति सिद्धम्। चतुर्णांकोशानामपेक्षयाऽऽन्तरिकत्वा-त्तथाऽधिष्ठानभूतत्वादानन्दमयकोश आनन्दमयपुरुषो वाऽऽत्मेति तन्मतम्। तत्र जाग्रदवस्थायां पञ्च एव कोशा विद्यमाना: सन्त: स्वकीयानि कार्याणि कुर्वन्ति। तेषां पञ्चकोशानामेवाधिष्ठानभूतोऽन्तरात्माऽऽनन्दमयकोशो वर्तते इत्यानन्दमयकोश आत्माऽस्तीति तन्मतम्। अर्थात् सर्वोऽपि विश्वप्रपञ्चस्तज्ज्ञानञ्चाज्ञान एव प्रविलीयत

इत्यानन्दमयकोशोऽज्ञानरूपोऽस्तीत्यज्ञानमेवात्मा विद्यत इति तन्मतमस्ति। सुषुप्तिदशायां बुद्ध्यादीनामज्ञानरूपात्मनि लयदर्शनादप्यज्ञानमेवात्मास्तीति तैरुच्यते। तत्र सुषुप्तौ किमपि ज्ञानं न भवति, सुषुप्तेः, जागरणकालस्य चात्मेक एवेति प्रत्यभिज्ञानं भवति। अतो ज्ञानस्य कादाचित्कत्वादात्मत्वं नैव संभवति। तस्माज्ज्ञानाद् भिन्नमज्ञानमेवात्माऽस्तीत्यङ्गीक्रियते। 'अहमज्ञः, अहं ज्ञानी' इत्याद्यनुभवाच्च ज्ञानरूपधर्मस्य कादाचित्कत्वं सिद्ध्यति। कदाचित् स्थितंकदाचिच्च विनष्टं ज्ञानं कथमात्मा भवेत्? अतो ज्ञानं नैवात्मनः स्वरूपमपि त्वात्मा जडस्वभावो विद्यत इति कुमारिभट्टस्यात्मविषयकं मतमस्ति। कुमारिलभट्टस्यानुयायिनस्तु सुषुप्त्यभिमानिनः प्राज्ञस्यैवात्मत्वमङ्गीकुर्वन्ति, तथा चोक्तम्- 'भाट्टस्तु "प्रज्ञानघन एवानन्दमय:" (माण्डूक्योपनिषद्-५) इत्यादिश्रुतेः, सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति। ' (वेदान्तसार:- ४३)अर्थाद्भाट्टमतानुसारमात्मा न जडपदार्थः, न च शुद्धचैतन्यम्, किन्त्वज्ञानोपहितं चैतन्यमस्ति। तथा चोक्तम्- 'अज्ञानोपहितत्वमज्ञानसंवलितत्त्वं ज्ञानाज्ञानरूपत्वम्, तदपि द्रव्यबोधरूपत्वमिति यावत्। ' (वेदान्तसार:- ४३, विद्वन्मनोरञ्जनी टीका) अर्थादज्ञानसंवलितत्त्वाज्ज्ञानाज्ञानरूपत्वाच्चात्मनोऽज्ञानोपहितत्वं सिद्ध्यति। तत्र ज्ञानांशो बोधरूपोऽज्ञानांशश्च द्रव्यरूप इत्येतन्मत आत्मन: 'द्रव्यबोधरूपत्वम्' चाङ्ग्रीक्रियते।

प्रज्ञानघन एवानन्दमयः, अर्थात् सुषुप्त्यवस्थायां प्रज्ञानमर्थाच्चैतन्यं घनीभूतं भवति। 'एव' शब्दात् प्रज्ञानभिन्नस्य वस्तुन: सम्बन्धो निषिद्ध्यते। 'आनन्दमय' पदे 'तत्प्रकृतवचनेमयट्' (पाणिनीयसूत्रम्- ५/४/२१) इति सूत्रात् प्राचूर्यार्थे मयट्प्रत्ययो भवति। अतोऽत्रानन्दप्राचूर्यस्य ग्रहणं कर्तव्यम्, न त्वानन्दविकारत्वम्। एतदेव तात्पर्यंशङ्कराचार्येणाप्युद्घाटितम्-'अत एव स्वप्नजाग्रन्मनःस्पन्दनानि प्रज्ञानानि घनीभूतानीव सेयमवस्थाविवेकरूपत्वात्प्रज्ञानघन उच्यते। यथा रात्रौ नैशेन तमसाविभज्यमानं सर्वं घनमिव तद्वत्प्रज्ञानघन एव। एव शब्दान्न जात्यन्तरं प्रज्ञानव्यतिरेकेणास्तीत्यर्थः। मनसो विषयविषय्याकारस्पन्दनायासदु:खाभावादानन्दमय आनन्दप्रायो नानन्द एव। ' (माण्डूक्योपनिषद्-५: शाङ्करभाष्यम्, पृ. ५५०) एतेन स्पष्टं भवति यद् सुषुप्तौ प्रज्ञानं प्रज्ञानमेवास्ति तथापि प्रज्ञानस्य घनीभूतत्वेन कस्यापि विषयविषयीतिरूपेण ज्ञानं नभवति, अतस्तत्राज्ञानमपि भवति। एतेनात्मनो ज्ञानाज्ञानरूपात्मज्ञानोपहितचैतन्यरूपत्वं वा सम्भवति। सुषुप्तौ प्रकाशाप्रकाशसद्भावो भवति। सुप्तो जन उत्थाय 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्'इति परामर्शं करोति। यदि सुषुप्तौ ज्ञानं नभवेत् तर्हि सुखमहमस्वाप्षमित्यनुभवः कथं स्यात् ? सुषुप्तौ मनस इन्द्रियाणाञ्चाभावेन पारिशेष्यादात्मनो ज्ञानांशो हि सुषुप्ते: प्रकाशको भवतीति मन्तव्यम्। 'न किञ्चिदवेदिषम्' इति परामर्शात् सुषुप्तौ कस्यापि विशेषज्ञानं नभवति। एतेन सुषुप्तावज्ञानस्यापि सद्भावो दृश्यते, एतदात्मनो द्रव्यांशोऽस्ति। अतो ज्ञानाज्ञानात्मक आनन्दमयः पुरुषएवात्मास्तीति भाट्टमतनिष्कर्षः।

वेदान्तदर्शने प्रस्तुतस्यानन्दमयपुरुषस्यानात्मत्वमङ्गीक्रियते। आनन्दमयकोशमतिक्रम्य पञ्चकोशसाक्षितत्त्वस्या न्वेषणमपरिहार्यं भवति। आनन्दमयस्यानात्मत्वं विद्यारण्यमुनिना यथा दर्शितम्- 'काचिदन्तर्मुखा वृत्तिरानन्दप्रतिबिम्बभाक्। पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते ॥ कादाचित्कत्वतोऽनात्मा स्यादानन्दमयोऽप्ययम्। बिम्बभूतो य आनन्द आत्मासौ सर्वदास्थितेः। । ' (पञ्चदशी- ३/९-१०)

भोक्तृशब्दवाच्यस्यानन्दमयस्यानात्मत्वमेव न त्वात्मत्वम्। 'पुण्यभोगे-पुण्यकर्मफलानुभवकाले काचिद्धीवृत्तिरन्तर्मुखा सती आनन्दप्रतिबिम्बभाक् आत्मस्वरूपस्यानन्दस्य प्रतिबिम्बं भजते, सैव भोगशान्तौ पुण्यकर्मफलभोगोपरमे सति निद्रारूपेण लीयते- विलीना भवति सा वृत्तिरानन्दमय इत्यभिप्रायः। ' (पञ्चदशी- ३/९ : रामकृष्णविरचितव्याख्या पृ. ७६) अर्थात् सुषुप्तौ विद्यमान आनन्दमयो बिम्भूतस्यानन्दस्य प्रतिबिम्बोऽस्ति नतु बिम्बभूत आत्मा। अयमानन्दमयोऽपि कादाचित्कत्वान्नित्य आत्मा भवितुं नार्हति। 'बुद्ध्यादौप्रतिबिम्बतयावस्थितस्य प्रियादिशब्दवाच्यस्यानन्दमयस्य बिम्बभूतः कारणभूतो य आनन्दोऽसावेवात्मा भवति। कुत इत्यत आह- सर्वदेति। नित्यत्वादित्यर्थः। विवादाध्यासित आनन्द आत्मा भवितुमर्हति नित्यत्वात्। य आत्मा न भवति नासौ नित्यो यथा देहादिः। गगनादेरुत्पत्तिमत्त्वेनानित्यत्वान्नानैकान्तिकतेति भावः। '(पञ्चदशी-३/१० : रामकृष्णविरचितव्याख्या, पृ. ७७) अतो वेदान्त आनन्दरूपता बिम्बभूतस्यात्मनोऽस्ति चेदानन्दमयकोशगत आनन्दः प्रतिबिम्बभूत आनन्दोऽस्तीति स्पष्टम्। आनन्दमयकोशस्यानात्मत्वं यथा प्रदर्शयति शङ्कराचार्योऽपि-'आनन्दप्रतिबिम्बचुम्बिततनुर्वृत्तिस्तमोजृम्भिता। स्यादानन्दमयः प्रियादिगुणकः स्वेष्टार्थलाभोदयः ॥ पुण्यस्यानुभवे विभाति कृतनामानन्दरूपः स्वयं। भूत्वा नन्दति यत्र साधु तनुभृन्मात्र प्रयत्नं विना।। आनन्दमयकोशस्य सुषुप्तो स्फूर्तिरुत्कटा। स्वप्नजागरयोरीषदिष्टसंदर्शनादिना।। नैवायमानन्दमयः परात्मा सोपाधिकत्वात्प्रकृतेर्विकारात्। कार्यत्वहेतोः सुकृतक्रियाया विकारसङ्घातसमाहितत्वात् ॥(विवेकचूडामणिः- २०९-२१०-२११) आनन्दमयकोशस्योपलब्धिस्थानं सुषुप्तिदशाऽस्ति। अस्यामवस्थायामेवा-नन्दमयकोशस्याभिव्यक्तिः सहजोत्कटाच भवति। तत्र तत्त्वमेतदहङ्कारादीनां स्फूरणमेव न भवति केवलं सुखस्यस्फूर्तिर्भवति। तच्च सुखं तमोजृम्भितमस्ति। जाग्रदाद्यन्यवस्थायां यदा सत्त्वगुणस्य वृद्धिर्भवति तथा यदा पुण्यकर्मपरिपाकस्वरूपा प्रियपदार्थोपलब्धिर्भूत्वा मोदस्य प्रमोदस्य च स्थितिर्भवति तदानन्दमयकोशस्याभिव्यक्तिर्भवति। पुण्यकर्मफलभोगस्य वृत्तावानन्दरूपस्यात्मनःप्रतिबिम्बनमानन्दमयत्वमुत्पद्यते। जीवस्य भोक्तृत्वमेवानन्दमयकोशोऽस्ति। अतोऽयमानन्दमयकोश आत्मा भवितुं नार्हति, तस्य कर्मजन्मत्वात्, स्थूलशरीराश्रितत्वात्, प्रकृतेर्विकारत्वात्, सोपाधिकत्वात्, तदानन्देऽपि न्यूनाधिक्ययोः तारतम्यत्वाच्च। आनन्दमयपुरुषे आनन्दमयस्यौपाधिकत्वेन बाध्यत्वमस्ति। साक्षी (पुरुषः)अबाध्योऽस्ति नित्यत्वादिति वेदान्तडिण्डिमघोषः।

**पञ्चकोशसाक्षिविवेकः**

वेदान्तदर्शनेऽन्नमयादिकोशानां कल्पना साक्षिचैतन्यावबोधाय विहिताऽस्ति। स्थूलशरीरमेवान्नमयकोशोऽस्ति शरीरावयसञ्चालनशक्तिर्हि प्राणमयकोशोऽस्ति। शरीरसञ्चालनेच्छा मनोमयकोशोऽस्ति चेदिच्छायाः कर्ता विज्ञानमयकोशोऽस्ति। शरीरसञ्चालनादिक्रियायां यच्छुखमुपलब्धं तत्प्रियत्वमानन्दमयकोशो विद्यते। इत्थं समस्तशरीरे पञ्चकोशस्यावस्थितिर्ज्ञातव्या भवति। शरीरेऽस्मिन् त्वगस्थिमांसरुधिरादिरूपेण विद्यमानोऽन्नमयकोशो नैव वास्तविक आत्मा। अन्नमयकोशस्य दृश्यत्वात्, विकारित्वात्, मर्त्यत्वात्, परिवर्तनशीलत्वात्। तद्विपरीत आत्मा द्रष्टा, अविकारी, अमृतः, एकरसः (कूटस्थः), साक्षी विद्यते। शरीरस्य क्रियाशक्तिरूपः प्राणमयकोशोऽपि नैवात्माऽस्ति। प्राणमयकोशस्य जडत्वादात्मनश्च चेतनत्वात्। क्रियाकरणेच्छारूपो मनोमयकोशोऽपि नैवात्मा भवितुमर्हति, सुषुप्तौ

तस्याभावेऽपि साक्षित्वेनात्मनो विद्यमानत्वात्। कर्तुरिच्छाप्रयत्नादीनां मूलप्रेरकः सुखरूप आनन्दमयकोशोऽपि नैवात्मा भवितुमर्हति। तस्यौवाधिकत्वादात्मनश्च निरूपाधिकत्वात्। आनन्दमयो नैवात्माऽपित्वानन्दरूप एव। केवलमुपलब्धिरेवात्माऽस्ति। यद् यद् दृश्यत्वेनज्ञायते तन्नैवात्मा। जाग्रदवस्थायां पञ्चकोशा एव कार्यं कुर्वन्ति। स्वप्नावस्थायामन्नमयकोश: क्रियाशीलो न भवति, चत्वार: कोशास्तु तत्र क्रियाशीला भवन्ति। तत्र प्राण: क्रियाशीलो भूत्वाऽऽन्नं पच्यते, रक्तसञ्चारादयोऽपि भवन्ति, नखकेशादयश्च वर्धन्ते। सर्वोऽपि स्वप्नो मनोमयोऽस्ति, तत्र कर्तृत्वाभिमानात्, सुखोपलब्धत्वाच्च विज्ञानमयस्यानन्दमयस्यचोपस्थितिर्ज्ञायते। सुषुप्त्यवस्थायांत्वन्नमय-मनोमय-विज्ञानमयाख्यास्त्रयोऽपि कोशाः विलीना भवन्ति, केवलं प्राणमयानन्दमयकोशद्वयमेव कार्यं कुरुत:। अन्नमय-प्राणमय-मनोमय-विज्ञानमयाऽऽनन्दमयकोशातिरिक्तत्वेन तथान्नमयपुरुष-प्राणमयपुरुष-विज्ञानमयपुरुषानन्दमयपुरुषण्यतिरिक्तत्वेन साक्षिरूपेण विद्यमानो निरूपाधिको गुणासंस्पृष्टश्चिन्मात्रो ज्ञातव्यो भवति। एते पञ्चकोशाः गुहारूपा: सन्ति। आत्मारूपसिंह एतासु गुहास्वन्त:स्थ:। पञ्चकोशानां साक्षी-आत्मा तत्कोशव्यतिरिक्तोऽस्ति।

विचारप्रणालीयमस्ति-एकस्मिन् समये साधकेनैकस्य कोशस्य विचार: करणीय:। पूर्वमहं शरीरमिति विचारणीयम्, पुनःपश्चात् श्रुतियुक्तिबलात् शरीरभावो निरसनीयः। शरीरमस्मीति विचारोऽध्यारोपोऽस्ति चेत् तन्निरासोऽपवादोऽस्ति। पुनश्चाहं प्राणोऽस्मीति विचारपूर्वकं नाहं प्राण इति निश्चेतव्यम्। एवं प्रकारेण मनोमय-विज्ञानमयानन्दमयकोशानाञ्चाध्यारोपापवादन्यायेन विचारो विधातव्यो भवति। पञ्चानामपि कोशानां निषेधे सत्यवशिष्टं साक्षिचैतन्यमेवात्मेति निश्चेतव्यम्। तथा चोपदिशति शङ्कराचार्य:- 'पञ्चानामपि कोशानां निषेधे युक्तितः श्रुतेः। तन्निषेधावधिः साक्षी बोधरूपोऽवशिष्यते। । योऽयमात्मा स्वयंज्योतिः पञ्चकोशविलक्षणः। अवस्थात्रयसाक्षी सन् निर्विकारो निरञ्जन:। सदानन्द: स विज्ञेय: स्वात्मत्वेन विपश्चिता।। '(विवेकचूडामणि:- २१२-२१३) पञ्चकोशानां निषेधेऽपि यो बोधरूपो ऽवशिष्यते स एव साक्षी। सचात्मा पञ्चकोशविलक्षण: स्वयंप्रकाशोऽस्ति। जाग्रत्स्वप्नसुषुप्त्यवस्थात्रयसाक्षी सन्नपि सोऽयमात्मा निर्विकारो निरञ्जन: सदानन्दो वर्तते। पञ्चकोशसाक्षित्वेन विराजमानोऽयमेवात्मा नाहं प्रत्ययोऽपि त्वहं- प्रत्ययस्य साक्षी विद्यते। साक्षी कोशातीतोऽस्ति, सर्वेषां कोशानामनुभवस्तस्य भवति। साक्षी कस्मिन्नपि कोशे न विद्यते परं सर्वेषां कोशानामधिष्ठानमस्ति। साक्षी न विषयो न च विषयी विद्यते, विषयविषयिणौ द्वावपि तस्यैव साक्षिणोऽन्यथाप्रतीतिरस्ति। यथा सर्प: रज्वोरन्यथाप्रतीतिरस्ति। सर्वदर्शनकालेऽपि रज्जु:प्रतीयत एव, किन्तु रज्जुरूपेण न सर्परूपेण। यथाऽन्धकारविनाशके प्रकाशोदये सर्पभ्रान्तिर्विनिष्टा सती रज्जुप्रतीतिर्भवति तथैवान्नमयादिकोशेषु याऽहंप्रतीतिरस्ति तस्यां प्रतीतावपि साक्ष्येव प्रतीतोऽस्ति तथापि साक्षिण: शुद्धस्वरूपस्याहंत्वेन प्रतीतौ समस्तानामहंप्रत्ययानां निषेधकं ज्ञानमावश्यकं भवति। तत्रापिसाक्षिण: प्रतीतिर्घटवन्नैव भवति। योऽनुभवात्माऽस्ति स कदाप्यनुभवस्य विषयो भवितुं नार्हति। आत्मनो भिन्नोन कोऽपि ज्ञाताऽस्ति, न च तदन्यज्ज्ञानम्। अत आत्मा अज्ञेयोऽस्ति। अज्ञेयत्वस्य कारणादात्मनोऽसत्वमिति तु नैवाशङ्कनीयम्, 'अत्रायं पुरुष: स्वयंज्योतिर्भवति'(बृहदारण्यकोपनिषद्- ४/३/९) 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (मुण्डकोपनिषद्- २/२/१०), 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' (तैत्तिरीयोपनिषद्-

२/३/१), 'येनेदं सर्वं विजानाति तं केन विजानीयात्' (बृहदारण्यकोपनिषद्- ४/५/१५) इत्यादिश्रुतिप्रमाणैरात्मनः स्वयंप्रकाशत्वमुपादितत्वात्। अतोऽन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयकोशातीतस्याधिष्ठानभूतस्य साक्षिचैतन्यस्यावबोध एव संसारनिवृत्तिरूपापवर्गाख्यस्य परमपुरुषार्थस्य साधनमिति ज्ञेयम्।

## उपसंहारस्तथा निष्कर्षः

वेदान्तदर्शनं खलूपनिषन्मूलकमस्ति। तत्र तैत्तिरीयोपनिषद्येव सर्वप्रथमं पञ्चकोशसिद्धान्तस्य बीजमुपलब्धमस्ति। अत एवोपनिषदियं पञ्चकोशसिद्धान्तस्याध्यात्मविद्याया वाऽऽधारभूमिर्विद्यते। सिद्धान्तस्यास्योद्देश्यं न केवलं मनुष्याणां शारीरिकस्य, प्राणिकस्य, मानसिकस्य, बौद्धिकस्य, कारणाज्ञानानन्दस्य च विश्लेषणमपि त्वात्मनो वास्तविकज्ञानपूर्वकं स्वस्वरूपावस्थानमेव। 'यो वेद निहितं गुहायां परमे व्योमन' इत्यादिश्रुत्या गुहाहितत्वेनाभिहितमात्मतत्त्वमन्नमयप्राणमय मनोमयविज्ञानमयाऽऽनन्दमयाख्यैः पञ्चकोशैरावृतमस्ति। आत्मन आच्छादकतया प्रस्तुताः पञ्चकोशा एव गुहाशब्देन निर्दिष्टाः सन्ति। गुहाशब्द-वाच्यानामन्नमयादिपञ्चकोशानामतिक्रमणेनैवात्मतत्त्वमुपलभ्यते। अन्नमयकोशेन देहोऽवबुध्यते। प्राणमयकोशेन जीवनशक्तिर्ज्ञायते। मनोमयकोशेन कर्ताविज्ञायते। विज्ञानमयकोशेन भोक्ता ज्ञायते। आनन्दमयकोशेन चाज्ञानं कारणमवबुध्यते। तत्रान्नमयकोशादभ्यन्तरः प्राणमयकोशः, प्राणमयादभ्यन्तरो मनोमयकोशः, मनोमयकोशादभ्यन्तरो विज्ञानमयकोशः, विशानमयकोशादभ्यन्तर आनन्दमयकोशश्च विद्यन्ते। तत्तत्कोशाभिमानिनोऽन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयपुरुषा नैव शुद्धात्मा भवितुमर्हन्ति, तेभ्यः पुरुषेभ्यः पृथगस्ति। तदात्मतत्त्वविज्ञानाय पूर्वं गुहाशब्दगम्यानामन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्यानां पञ्चानामप्याच्छादकानां कोशानां विचारस्तथा विवेक: कर्तव्यो भवति। तत्रास्माकं स्थूलशरीरमेवान्नमयकोशोऽस्ति। जननमरणयोः प्रागुत्तराविद्यमानोऽन्नमयकोशाख्यदेहोऽयं कथमप्यात्मा भवितुं नार्हति। तथा च प्रयोगः-'अन्नमयकोशो नैवात्मा, आद्यन्तवत्वात्, घटवदिति। एवमेव कर्मेन्द्रियैः सहितं प्राणादिपञ्चकमेव प्राणमयकोशो विद्यते। इन्द्रियाऽभावेऽपि खल्वन्धपङ्ग्वादयो जीवा जीवमानाः सन्तीति नेन्द्रियमात्मेति सिद्ध्यति। शरीरे शक्तिप्रदायकत्वादिन्द्रियप्रेरकत्वाच्च प्राणमयकोश आत्मेति प्रतिपादयतां प्राणात्मवादिनो मतं नैव समीचीनम्। घटवज्जडत्वात् प्राणमयकोशोऽपि नैवात्मा भवितुमर्हति। एवञ्च पञ्चज्ञानेन्द्रियैः सहितं मन एव मनोमयकोश इत्युच्यते। यथा विकारी देह आत्मा न भवति तथैव मनोमय कोशोऽपि नैवात्मा भवति। क्रोधादिविकारैर्विक्रियमाणतया मनोमयस्यानात्मत्वं स्वतः सिद्धम्। एवमेव पञ्चज्ञानेन्द्रियैः सहिता बुद्धिरेव विज्ञानमयकोश इत्युच्यते। तस्य विज्ञानमयस्याप्यात्मत्वं नैव सिद्ध्यति। यतो हिविज्ञानमयो नैवात्मा, सुषुप्तौ लीयमानत्वेन विलयाद्यवस्थावत्वाद्, घटवदित्यनुमानेन तस्यात्मत्वमपास्तम्। एवञ्च चिच्छायोपेतं कारणमज्ञानमेव ह्यानन्दमयकोश इत्युच्यते। अयमानन्दमयोऽपि खल्वात्मा भवितुं नार्हति, तस्य कादाचित्कत्वादभ्रादिवदित्यनुमानान्निरस्तम्। एवमन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयाख्यानां पञ्चानामपि कोशानां युक्तितः श्रुतितश्च निषेधे सति बोधस्वरूप आत्मैवावशिष्यते। सचात्मा पञ्चकोशविलक्षणोऽवस्थात्रयसाक्षी निर्विकारो निरञ्जनः सदानन्दो नित्यशुद्धबुद्धमुक्तस्वभावः सर्वोपाधिवर्जितः षड्भावविकारशून्य: स्वयंप्रकाशो विद्यते।

पञ्चकोशाधिष्ठानभूतस्यात्मतत्त्वविज्ञानमेव विवेकिभिः साधकैर्वा कर्तव्यम्। पञ्चकोशानामधिष्ठानन्तथासाक्षिचैतन्यमेव ब्रह्मतत्त्वम्। ब्रह्मतत्त्वविज्ञानादेव स्वात्मन्यवस्थारूपस्य परमपुरुषार्थभूतस्य मोक्षस्योपलब्धिर्भवतीत्यद्वैतदर्शनाभिमतपञ्चकोशसिद्धान्तस्य तात्पर्यभूतनिष्कर्षः।

## सन्दर्भग्रन्थसूची


ईशादि दश उपनिषद् (२०७३), व्या. रामानन्दगिरि, देवघाटधाम : महेश-संस्कृत-गुरुकुलम्।

ईशादि नौ उपनिषद् (२०६८), शङ्कराचार्यः, शाङ्करभाष्येण, हिन्द्यनुवादेन चसमन्विता, गोरखपुर : गीताप्रेस।

छान्दोग्योपनिषद् (२०६९), शङ्कराचार्यः, शाङ्करभाष्येण, हिन्द्यनुवादेन चसमन्विता, गोरखपुर : गीताप्रेस।

तुलनात्मकदृशा दर्शनान्तराद्वैतदर्शनाभिमतमोक्षतत्त्वविवेक: (२०८०), घिमिरे, उमेशप्रसादः, (अप्र. वि. शो.) अनुसन्धानकेन्द्रम्, नेपाल-संस्कृतविश्वविद्यालय:।

पञ्चदशी (ई. २००१), विद्यारण्यमुनिः, रामकृष्णविरचितव्याख्यासंवलिता, दिल्ली-वाराणसी : भारतीय विद्या प्रकाशन।

पूर्वीयदर्शनमा मोक्षचिन्तन (२०७३), घिमिरे, उमेशप्रसादः, रामेछाप : उमेशप्रसाद घिमिरे।

बृहदारण्यकोपनिषद् (२०६८), शङ्कराचार्यः, शाङ्करभाष्येण, हिन्द्यनुवादेन च समन्विता, गोरखपुर : गीताप्रेस।

ब्रह्ममीमांसासूत्रम् (ई.२००२), कौण्डिन्यायनः, शिवराज आचार्य, शाङ्करभाष्यानुकुलया कौण्डिन्न्यायनवृत्त्या संवलितम् हिन्दिभाषानुवादसहितम्, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

वेदान्तबोध (ई.२००७), अखण्डानन्दसरस्वती, बम्बई : सत्साहित्य प्रकाशन ट्रष्ट।

वेदान्तसन्दर्भ: (२०४५), शङ्कराचार्यः, वाराणसी : महेश-अनुसन्धान संस्थानम्।

वेदान्तसार: (ई.१९७२), सदानन्दः, विद्वन्मनोरञ्जनीटीकासहितः, व्या.रामतृप्तयतिः, वाराणसी : चौखम्बा अमरभारती प्रकाशन।

वेदान्तसार: (ई.१९७९), सदानन्दः, व्याख्याकार:- शुक्लः, बदरीनाथः, वाराणसी :मोतीलाल वनारसीदास।

वेदान्तसिद्धान्त: (२०७१), घिमिरे, उमेशप्रसादः, रामेछाप : नीतु घिमिरे।

शब्दकल्पद्रूम: (ई.२००२) (सम्पा.), देवराजः, रमाकान्तः, दिल्ली : राष्ट्रिय संस्कृत संस्थान।

शाङ्करवेदान्तकोश: (ई.१९९८), पाण्डेयः, मुरलीधरः, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

श्रीमद्भगवद्गीताभाष्यम् (२०७२), शङ्कराचार्यः, वाराणसी : श्रीदक्षिणामूर्तिप्रकाशनम्।

षड्दर्शनीसङ्ग्रहः (ई.२००२), (सम्पा.), घिमिरे, दीर्घराजः, दाङ : महेन्द्रसंस्कृतविश्वविद्यालयः।

सर्वदर्शनसङ्ग्रहः (ई. २००४), माधवाचार्यः, हि.व्या.शर्मा, उमाशङ्कर, वाराणसी :चौखम्बा विद्याभवन।

सर्वदर्शनसङ्ग्रहः (ई. १९५१), माधवाचार्यः, वासुदेवशास्त्रिविरचितदर्शनाङ्कुराभिधव्याख्ययासहितः, भारतः : प्राच्यविद्यासंशोधनमन्दिरम्।